SEMESTER -III

SANSSEC01M/SEC 1

paragraph writing :

## (1) পুস্তকমেলা

**উপক্রমঃ :** 'মেলা' শব্দস্য অর্থঃ খলু মনুষ্যাণাং সম্মিলন-স্থানম্ । বহুবিধানাং মেলানাং মধ্যে পুস্তক-মেলা অন্যতমা । পুস্তকানাং প্রদর্শনার্থং তথা ক্রয়-বিক্রয়ার্থং উন্মুক্তে বিশালে প্রাঙ্গণে সাময়িকম্ অনেকম্ আপণং নির্মীয়তে । তত্র জনাঃ স্ব-স্ব-রুচ্যনুসারেণ পুস্তকক্রয়ং কুর্বন্তি । দেশস্য সংস্কৃতেঃ প্রাণস্বরূপা ইয়ং পুস্তকমেলা । কবি-সাহিত্যিকানাং তথা অন্যবিধানাং লেখকানাং চিন্তা-চেতনায়াঃ বাঙ্ময়-রূপং প্রদর্শনক্ষেত্রং হি পুস্তকমেলা ।

**নানাবিধাঃ পুস্তকমেলাঃ :-** পূর্বং কেবলম্ রাজ্যস্য রাজধান্যাং পুস্তক-মেলা অনুষ্ঠিতা । তদা সাধ্যে সত্যপি সামর্থ্যাভাবাৎ স্বল্পা এব জনাঃ তত্র গন্তুং শক্যাঃ আসন্ । বিশাল-জ্ঞানভাণ্ডারস্য পুস্তকরূপং স্বচক্ষুষা দর্শনম্ অসম্ভবম্ আসীৎ । ততঃপরম্ পুস্তকপ্রেমিনাং জ্ঞানপিপাসায়াঃ জিলাস্তরে পুস্তকমেলায়াঃ ব্যবস্থা কৃতা । ছাত্র-ছাত্রাঃ শিক্ষকাঃ তথা অন্যবিধ-জীবিকাভিঃ সহ যুক্তাঃ নাগরিকাঃ অপি মেলাপ্রাঙ্গণম্ আগত্য স্বরুচ্যনুসারেণ পুস্তকক্রয়ং কুর্বন্তি ।

**বিশ্বসংস্কৃত-পুস্তকমেলা :-** ভারতস্য সর্বেভ্যঃ রাজ্যেভ্যঃ তথা বিশ্বস্য প্রায়ঃ সর্বেভ্যঃ দেশেভ্যঃ সংস্কৃতানু-রাগিনঃ তত্র সম্মিলিতাঃ । সহস্রাধিকং নবং পুস্তকম্ একস্মিন্নেব দিনে প্রকাশিতম্ । নবীনপ্রজন্মস্য লেখকাঃ অপি প্রভূতম্ উৎসাহং প্রাপ্তাঃ । এতেন ভারতীয়সংস্কৃতিঃ প্রভূতং সমৃদ্ধং জাতা ।

Scanned by CamScanner

**পুস্তকমেলায়াং নানাবিধং সাংস্কৃতিকানুষ্ঠানম্ :-** পুস্তকমেলা ন কেবলং পুস্তকানাং মেলা, অপি তু সংস্কৃতেরপি মেলা। পুস্তকমেলাভ্যন্তরে মঞ্চং নির্মায় তত্র বিভিন্নরাজ্যস্য লোকসংস্কৃতিঃ অপি প্রদর্শ্যতে। শিল্পিনঃ লোকগীতিং লোকনাট্যং লোকনৃত্যং চ প্রদর্শ্য পুস্তকপ্রেমিনাং মনোরঞ্জনং কুর্বন্তি। পুস্তকমেলায়াঃ সর্বাপেক্ষয়া মহত্তমা প্রাপ্তিঃ খলু কবিসম্মেলনম্। পাঠকাঃ স্বচক্ষুষা প্রিয়ান্ কবীন্ পশ্যন্তি। কবয়ঃ অপি স্বরচিত-কবিতাপাঠেন পাঠকানাং চিত্তং সুতরাম্ আমোদয়ন্তি। এতেন লেখকৈঃ সহ পাঠকানাং প্রত্যক্ষঃ যোগঃ সংস্থাপ্যতে।

**উপসংহারঃ :-** পুস্তকমেলা ভারতীয়সংস্কৃতৌ প্রাণবায়ুং সঞ্চারয়তি। দূরদর্শনম্, কম্পিউটার ইত্যাদীনা মনুষ্যাঃ গৃহে এব আবদ্ধাঃ জাতাঃ। এতেন তে অবসাদগ্রস্তাঃ জায়ন্তে। পুস্তকমেলা তেভ্যঃ নবরূপেণ প্রাণশক্তিং দদাতি। পুস্তকমেলা প্রভাবেন এব ছাত্র-ছাত্রীণাং মধ্যে পাঠ্যপুস্তকেভ্যঃ ব্যতিরিক্তানি পুস্তকানি প্রতি আগ্রহম্ উত্তরোত্তরং বর্ধতে। পুস্তকপাঠস্য কোঽপি বিকল্পঃ নাস্তি ইতি বোধঃ শিক্ষিতেষু জনেষু জাগর্তি। এবমেব পুস্তকমেলা দেশস্য প্রভূতম্ উপকারং সাধয়তি ইতি।

Scanned by CamScanner

# রাজনীতিক্ষেত্রে ভ্রষ্টাচারঃ/কদাচারঃ

উপক্রমঃ :- 'রাজনীতি' শব্দস্য অর্থঃ খলু রাজ্যপরিচালনাবিষয়ে রাজানুসৃতা নীতিঃ। অর্থশাস্ত্রে ইয়ং তু দণ্ডনীতিঃ ইত্যভিধীয়তে। দেশস্য উন্নতি-বিবর্ধনার্থং প্রজানাং সুখস্বাচ্ছন্দ্য-বিধানার্থং সর্বেষাম্ অধিকার-রক্ষণার্থম্ রাজ্ঞা যে ভব্য উপায়াঃ অবলম্ব্যন্তে তে এব 'রাজনীতি' শব্দেন অভিধীয়ন্তে। বর্তমানে রাজা নাস্তি, পরন্তু গণতান্ত্রিকদেশে শাসনকার্য-পরিচালনা-বিষয়ে বিভিন্ন রাজনৈতিক-দলানাম্ অনুসৃতানি কৌশলানি এব রাজনীতিঃ ইত্যনেন পরিচান্যতে।

রাজনীতিক্ষেত্রে সাম্প্রতিকঃ ভ্রষ্টাচারঃ/কদাচারঃ :- বর্তমানে ভারতস্য রাজনীতিঃ বহুপ্রকারেণ দূষিতা জাতা। দেশস্য স্বাধীনতা-লাভাৎ পরম্ দেশস্য সমৃদ্ধয়ে রাজনৈতিকদলাঃ দলীয়াদর্শম্ কথঞ্চিৎ অনুসর্তুং চেষ্টন্তে স্ম। কেচিৎ নেতারঃ দেশসেবার্থম্ সত্যমেব আত্মোৎসর্গং কৃতবন্তঃ। মহাত্মা গান্ধী, নেতাজী সুভাষ-চন্দ্রঃ বোসঃ প্রমুখাঃ বরেণ্যাঃ নেতারঃ অস্মাকং প্রাতঃস্মরণীয়াঃ। যতঃ প্রভৃতি গণতান্ত্রিকব্যবস্থায়াং নির্বাচনপ্রক্রিয়া ক্ষমতালাভস্য ব্যাপারঃ আরব্ধঃ, ততঃ প্রভৃতি শাসনব্যবস্থায়াং ভ্রষ্টাচারঃ প্রবিষ্টঃ। কদাচিৎ সংসদি বহুমতসিদ্ধ্যর্থং অন্যদলানাং সদস্যেভ্যঃ উৎকোচঃ প্রদীয়তে, কদাচিৎ বিভাগীয়-মন্ত্রিণঃ উৎকোচং গৃহ্ণন্তি, কদাচিৎ প্রতিরক্ষা-সামগ্রীণাং ক্রয়বিষয়ে, কদাচিৎ ভূম্যধিগ্রহণবিষয়ে কদাচিৎ ভূমিবণ্টনবিষয়ে, কদাচিৎ কর্মক্ষেত্রে নিয়োগবিষয়ে রাজনৈতিক-নেতৃণাং কদাচারঃ মাত্রাতিরিক্তং বৃদ্ধিং প্রাপ্তঃ। ন কেবলং তৎ অপি তু রাজনৈতিক-নেতৃণাম্ আচরণমপি শিষ্টাচারস্য সীমাম্ অতিক্রামতি। রাজনীতেঃ কলুষভাবেন এব অধুনা মানবেষু সুসম্পর্কম্ ক্রমশঃ বিনশ্যতি। শনৈঃ শনৈঃ রাজনীত্যা সহ যুক্তেষু জনেষু সাধারণজনানাং বিশ্বাসং হ্রাসং প্রাপ্নোতি।

প্রতীকারঃ :- প্রথমতঃ সাধারণজনানাম্ অশিক্ষা-দারিদ্র্য-কুসংস্কারস্য সুযোগং গৃহীত্বা রাজনৈতিকনেতারঃ স্বার্থসিদ্ধয়ে তান্ ব্যবহরন্তি। অতঃ সর্বপ্রথমম্ সর্বেভ্যঃ দেশ-বাসিভ্যঃ প্রকৃতং শিক্ষা প্রদাতব্যা। তেন তে রাজনীতিকানাং

Scanned by CamScanner

প্রবঞ্চনাং বোদ্ধুং সমর্থাঃ ভবেয়ুঃ।

দ্বিতীয়তঃ, শিল্পিনঃ কলাকুশলিনঃ নাটকমাধ্যমেন, গান-মাধ্যমেন, রাজনৈতিকঘটনানাং কদাচারঃ জনসমক্ষে আনেতব্যঃ।

তৃতীয়তঃ, দূরদর্শনম্, সংবাদপত্রম্ তথা অন্যেঽপি প্রচারমাধ্যমাঃ অস্মিন্ বিষয়ে নিরপেক্ষ-ভূমিকাং গৃহ্ণীয়ুঃ।

চতুর্থতঃ, শিক্ষিতাঃ রুচিসম্পন্নাঃ জনাঃ অপি রাজনীতিবিমুখাঃ ন ভূত্বা যথাসম্ভবম্ রাজনীত্যা সহ যুক্তাঃ ভবেয়ুঃ।

উপসংহারঃ : দেশস্য তথা সমাজস্য সামগ্রিকোন্নতিবিধানার্থং গণতান্ত্রিকব্যবস্থায়াঃ নির্মলত্বং রক্ষিতব্যম্। ভ্রষ্টাচারিণঃ, কদাচারিণঃ, দুর্নীতিগ্রস্তাঃ জনাঃ রাজনীতিক্ষেত্রে সর্বথা পরিত্যাজ্যাঃ। সামাজিকানুষ্ঠানাদপি তেষাং বহিষ্কর্তব্যম্। জীবনস্য সর্বস্মিন্ ক্ষেত্রে তে বর্জনীয়াঃ। তেষাং কৃতে দৃষ্টান্তমূলকং কঠোরং দণ্ডবিধিং কর্তব্যম্। অস্মাকম্ উচ্চন্যায়ালয়ঃ অস্মিন্ বিষয়ে তৎপরঃ ভবেৎ ইতি।

---

Scanned by CamScanner